# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः – रामानुजवेदान्तः | **कोड – CE-3.5.9** | समयः – ११ तः ०२ पर्यन्तम् |
| दिनाङ्कः – ०१/१२/२०१६ | सन्दर्भग्रन्थः – भगवद्गीता (७-९ अध्यायाः) रामानुजभाष्यसहिता | |

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधस्तनेषु श्लोकेषु द्वयोः श्लोकयोः यथाभाष्यं व्याख्यां कुरुत।** ०८

(१) मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥

(२) त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्।

(३) तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) भगवत्तत्त्वज्ञानस्य दौर्लभ्यं निरूप्य भगवद्भक्तानां चातुर्विध्यं निरूपयत

(२) सप्तमाध्यायस्य सारांशं लिखत।

**प्रश्नः – ३ निम्नलिखितयोः कस्यचिद् एकस्य उपरि लघुटिप्पणीं लिख्यताम्** ०२

(१) अष्टधा प्रकृतिः। (२) "दैवी ह्येषा गुणमयी मम माया दुरत्यय"।

**प्रश्नः – ४ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत।** ०२

(१) कृत्स्नस्य जगतः प्रभवः प्रलयः क ? (३) श्रीभगवान् शशिसूर्ययोः किम् अस्ति?

(२) सर्वं कस्मिन् सूत्रे मणिगणा इव प्रोतम्? (४) कः जिज्ञासुः ?

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ५ अधस्तनेषु श्लोकेषु द्वयोःश्लोकयोः यथाभाष्यं व्याख्यां कुरुत** ०८

(१) अभ्यासयोगेनयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥

(२) ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥

(३) अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत।** ०८

(१) अर्जुनकृतसप्तप्रश्नानाम् उत्तराणि यथाभाष्यं विशदयत

(२) देवनायपितृयाणमार्गस्य यथाभाष्यं निरूपणं कुरुत

**प्रश्नः – ७ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) "परमः पुरुषः"। (३) "दुःखालयमशाश्वतम्"।

(२) "अक्षरं ब्रह्म"। (४) "उत्तरायणम्" ।

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) कस्य पुनर्जन्म न विद्यते ?
(२) के लोकाः पुनरावर्तिनः ?
(३) दक्षिणायने कति मासाः भवन्ति ?
(४) का शुक्ला गतिः ?
(५) का कृष्णा गतिः ?
(६) श्रीमद्भगवद्गीता केन प्रोक्ता ?
(७) भगवद्गीताभाष्यं केन प्रणीतम् ?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ अधस्तनेषु श्लोकेषु द्वयोः श्लोकयोः यथाभाष्यं व्याख्यां कुरुत** **०८**

(१) अश्रद्धानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥

(२) सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥

(३) अहं कर्तुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ।

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** **०८**

(१) नवमाध्यायस्य सारांशं यथाभाष्यं विलिखत
(२) वर्तमानसामाजिकजीवनसन्दर्भे भगवद्गीतायाः प्रासङ्गिकताविषये एकं निबन्धं लिखत ।

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्** । **०४**

(१) राजविद्या ।
(२) मोघाशा ।
(३) मोघकर्माणः ।
(४) पूतपापाः ।

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** **०५**

(१) नवमाध्यायस्य नाम किम् ?
(२) "भूतभावनः" इति पदस्य कः अर्थः ?
(३) निखिलजगदेककारणं किम्?
(४) अस्य जगतः माता धाता पितामहः च कः ?
(५) का त्रिविद्या ?
(६) किं नाम योगक्षेमः ?
(७) पितृव्रताः कान् यान्ति?

***

**Answer Key**

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ७** गुणाः - ७०

विषयः – रामानुजवेदान्तः **कोड – CE-3.5.9** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – ०१/१२/२०१६ सन्दर्भग्रन्थः – भगवद्गीता (७-९ अध्यायाः) रामानुजभाष्यसहिता

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – ३**
१. भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
२. सत्त्वरजस्तमोमयी माया दुरतिक्रमा

**प्रश्नः – ४**
१. परमात्मा
२. परमात्मनि
३. प्रभा
४. प्रकृतिवियुक्तात्मस्वरूपावाप्तिच्छुः ।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ७**
१. दिव्यः पुरुषः परमात्मा ।
२. अक्षरमस्थूलत्वादिगुणकं ब्रह्म
३. मां परमात्मानं प्राप्य निखिलदुःखालयमस्थिरं जन्म न प्राप्नुवन्ति ।
४. अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्

**प्रश्नः – ८**
१. भगवद्भक्तस्य
२. आ ब्रह्मभुवनाल्लोकाः
३. षण्मासाः
४. शुक्ला गतिः अर्चिरादिका, शुक्ल्या अनावृत्तिः
५. कृष्णा गतिः धूमादिका, कृष्णया पुनरावर्तते
६. श्रीकृष्णेन
७. रामानुजाचार्येण

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ११**
१. विद्यानां राजा
२. मोघवाञ्छिताः निष्फलवाञ्छिताः
३. निष्फलकर्माणः
४. त्रैविद्यास्तु वेदप्रतिपाद्यकेवलेन्द्रादियागविशिष्टसोमान् पिबन्तः पूतपापाः

**प्रश्नः – १२**
१. राजविद्याराजगुह्ययोगः
२. मम मनोमयः सङ्कल्प एव भूतानां भावयिता धारयिता नियन्ता च ।
३. ब्रह्म
४. परमात्मा
५. ऋग्यजुसाम इति
६. अप्राप्तस्य प्राप्तिः योगः, प्राप्तस्य रक्षणं योगः ।
७. पितॄन्